International Journal of Sanskrit Research 2024; 10(4): 161-164

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(4): 161-164
© 2024 IJSR
www.anantaajournal.com
Received: 06-06-2024
Accepted: 07-07-2024

**ड .श्रद्धाञ्जलिमहापात्रः**
सहायकाचार्या,
अद्वैतवेदान्तविभागः
श्रीजगन्नाथसंस्कृतविश्वविद्यालय,
पुरि, ओडिशा, भारत

**Corresponding Author:**
**ड .श्रद्धाञ्जलिमहापात्रः**
सहायकाचार्या,
अद्वैतवेदान्तविभागः
श्रीजगन्नाथसंस्कृतविश्वविद्यालय,
पुरि, ओडिशा, भारत

# शिवस्वरूपम्

**ड .श्रद्धाञ्जलिमहापात्रः**

**सारांश:**
शिवः परमानन्दबोधरूपं, शिवः निरतिशयसुखस्वरूपम्, शिव अज्ञान विनाशकत्वे सति ज्ञानस्य प्रकाशरूपत्वम्। लौकिकैः सृष्टिकर्ता ब्रह्मा ,पालनकर्ता विष्णुः , तथा संहारकर्ता महेश्वरः शिव इति कथयन्ति। पुराणेषु शिवस्वरूपविषये बहु आलोचना परिदृश्यते । ते शिवं केवलं संहारकर्तृरूपेण पुराणेषु प्रदर्शयन्ति। किन्तु शाङ्करवेदान्ते शिवस्वरूपं प्रतिपादनावसरे मधुसूदनसरस्वतीमहाभागेन शिवः परमानन्दबोधरूप इति प्रतिपादितम् । "शिव केवलोऽहम्" ,इति उक्त्या आत्मज्ञानिनाम् आत्मस्वरुपे अवस्थानं प्रतिपादयति शंकरः । अतः शिवः न केवलं संहारकर्ता अपितु सृष्टि-स्थिति-लयकारणं परब्रह्मपरमात्मा इत्युक्तम् । शिवः ज्ञानस्वरूपम् आनन्दस्वरुपम्, शान्तकान्तस्वरुपम्, प्रज्ञानघनस्वरूपम् । "आनन्दात् खलु इमानि भुतानि जायन्ते आनन्देन जातानि जीवन्ति आनन्दं प्रयन्ति अभिसम्विसन्ति" इति आनन्दसम्बलितं श्रुतिवाक्यं परमात्मनः आनन्दस्वरूपत्वं प्रतिपादयति।

**कूटशब्द:** शांकरवेदान्तः, शिवः, ब्रह्मा, विष्णुः, महेश्वरः,आनन्दस्वरूपः

## प्रस्तावना
अस्मिन् संसारे ये आनन्देन जीवन्ति ते सर्वे ब्रह्मज्ञानिनः सन्ति। किञ्च साधारणजनाः प्रतिमुहूर्ते दुःखं सुखं च अनुभवन्ति। सुखं आगच्छति किन्तु क्षणेन अपसरति। जनाः सुखदुखेषु प्रपीडिताः भवन्ति। अतः संसारसागरात् समुद्धरणार्थं शिवस्वरूपप्राप्त्यर्थं श्रीमद्भगवद्गीतायां बह्वालोचना विहिता । यथा –

"रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन्
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥[1]
आत्मप्रसादलाभेन सर्वदुखर्निवृत्तिः ।
उच्यते गीतायां-
"प्रसादे सर्वदुखानां हानिरस्योपजायते" ।[2]

श्रीमद्भगवद्गीतायां उक्तं श्रीकृष्णेन –

न तद्भासयते सूर्यो न शशाङ्क न पावकः ।
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम" ॥[3]

अतः परमात्मनः अयं लोकः नित्यप्रकाशस्वरूपम् तेषां स्वप्रकाशत्वात् स्वयंज्योतिस्वरूपत्वात्। तत्र गमनानन्तरं पुनरावृत्तिः नैव भवति । नैव संसारचक्रे पुनःपुनः आपद्यते आत्मज्ञानी। स परमपावन ब्रह्मलोकं ब्रह्मज्ञानेन एव प्राप्तिर्भवति। ये निर्गुणब्रह्मज्ञानीनः ते शरीर त्यागानन्तरं साक्षात् ब्रह्मप्राप्य ब्रह्म भवन्ति। ये सगुण ब्रह्मज्ञानीनः ते शरीर त्यागानन्तरं हिरण्यगर्भलोकं गच्छन्ति। तत्र हिरण्यगर्भलोके प्रलयानन्तरं ते अपि ब्रह्मत्वं प्राप्नुवन्ति। अतः अनाशक्तः कर्मकृत्वा अनाशक्तः सन् ब्रह्मणः ध्यानेन ब्रह्मात्मा लभन्ते ज्ञानिनः-उच्यते गीतायां –

"ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा" ॥[4]

ब्रह्मज्ञानिनः न कुत्रापि लिप्तः भवति। न पूण्येन न पापेन कर्मणा वा। पद्मपत्रमिवाम्भसा ते तिष्ठन्ति। यच्चोक्तं मुण्डकोपनिषदि –

नायमात्मा बलहीनेन लभ्यो
न च प्रमादात्तपसो वाप्यलिङ्गात् ।
एतैरूपायैर्यतते यस्तु विद्वां-
स्तस्यैष आत्मा विशते ब्रह्मधाम ॥[5]

अत्रोच्यते आत्मज्ञान प्राप्त्यर्थ्यं वलमपि अपेक्षते । तत् बलम् आत्मनिष्ठपुरुषस्य एव जायते।आत्मा आत्मकृपासाध्यः । तत्रापि आत्मवलम् अपि अपेक्षते। तत् वलम् न पुत्र-मित्र-वित्तादि साधनविशिष्टं नापि सामाजिक–राजनैतिक-अर्थिकदृष्ट्यावलम् । तत् बलम् आत्मज्ञाननिष्ठस्य साधनम् सम्यग्ज्ञानम्। तदाह भगवता श्रीकृष्णेन- "बलं बलवतां चाहं कामराग विवर्जितम्"[6] अर्थात् कामरागविवर्जितं व्यक्तेः यद्बलं तदेवाहमिति श्लोकार्थः । उच्यते आचार्यशङ्करेण मुण्डकोपनिषद्भाष्ये –"यस्मादयमात्मा बलहीनेन वलप्रहीणेनात्मनिष्ठजनितबीर्यहीनेन न लभ्यो नापि लौकिकपुत्रपश्वादिविषय सङ्गनिमित्त प्रमादात् । तथा तपसा वाप्यलिङ्गालिङ्ग रहितात्। तपोऽत्र ज्ञानम्। लिङ्गमत्र सन्यासः। सन्यासरहिताज्ज्ञानान्न लभ्यत इत्यर्थः। एतैरूपायैर्वलाप्रमादसन्याससंज्ञानैर्यतते तत्परः सत्प्रयतते यस्तु विद्वान् विवेकत्यात्मवित्तस्य बिदुष एव आत्मा विशते संप्रविशति ब्रह्मधाम"[7] । अतः बलरहितस्य साधनरहितस्य अविवेकिनः आत्मज्ञानं नैव भवति। आत्मज्ञानप्राप्त्यर्थं साधनसम्पन्नमावश्यकम् । किम् तत् साधनम् । कथं तत् आत्मज्ञानं लभते ? उच्यते मुण्डके –

"सत्येन लभ्यस्तपसा ह्येष आत्मा ।
सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम् ॥[8]

सत्येन नाम अनृतत्यागेन मृषावदनत्यागेन लभ्यः प्राप्तव्यः स आत्मा । यदुक्तं महाभारतशान्तिपर्वणि -

मनसाश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तपः ॥[9] पुनश्च साधनचतुष्टयप्रतिपादितं आचार्यशंकरेण ब्रह्मसूत्रभाष्यावसरे– "नित्यानित्यवस्तुविवेक इहामुत्रार्थ-फलभोगविरागः शमदमादि षट्सम्पत्तिः मुमुक्षत्वं च।" विवेकचूडामणौ आचार्यशङ्करेण उक्तं –

आदौनित्यानित्य वस्तुविवेकः परिगण्यते ।
इहामुत्र-फलभोग-विरागस्तदनन्तरं ॥
शमादिषट्कसम्पत्तिमुमुक्षुत्वमिति स्फुटम् ।
ब्रह्मसत्यं जगन्मिथ्या इत्येवं रूपो विनिश्चयः" ॥[10]

मनसः निग्रहावस्था सम इत्युच्यते। वहिरिन्द्रियाणां निग्रहः दम इत्युच्यते। शीतोष्णादिद्विन्दसहिष्णुता तितिक्षा। गुरुवेदान्तवाक्येषु विश्वासः श्रद्धा । चित्तैकाग्र्यं समाधानम् । शम–दम लक्षणप्रतिपादनावसरे आचार्य शंकरेण विवेकचूडामणौ प्रतिपादितम्-

"स्वलक्ष्ये नियतावस्था मनसः श्म उच्यते ।
उभयेषामिन्द्रियाणां स दमः परिकिर्तितः॥"[11]

अपरोक्षानुभुतिग्रन्थेऽपि शमादयः प्रतिपादितः। आत्मानात्मविवेके उक्तम्-"एतैः शमादि सम्पत्तैः आत्मानात्मविवेकः कर्तव्यः । अन्यत्रापि-"दिने दिने तु वेदन्तविचारात् भक्तिसंयुक्तात् गुरु शुश्रुषया लब्धात्कुच्छ्रशीतिफलं लभेदिति" ।

तत्र आत्मा नाम स्थुलसूक्ष्मकारणशरीरव्यतिरिक्तः पञ्चकोषविलक्षणोऽवस्थात्रयसाक्षी सच्चिदानन्दरूपः। अनात्मा नाम अनित्यजडदुखात्मकं समष्टिव्यष्ट्यात्मकं शरीरत्रयमनात्मा ।एतैः आत्मानात्मविवेकैः आत्मज्ञानस्य प्रप्तिमार्गस्य भवति अवतारणम् । शीर्यते इति शरीरम् । शरीरम् अनृतम् । अनृतं नाम कालत्रयेषु अविद्यमानवस्तुः । जडो नाम स्वविषयपरविषयज्ञानरहितं वस्तुविशेषम् । सद्रूपत्वं नाम केनाप्यबाध्यमानत्वेन कालत्रयेऽपि एकरुपेण विद्यमानत्वम् । चिदृपत्वं नाम साधनान्तरनिरपेक्षतया स्वयं प्रकाशमानत्वे सति स्वस्मिन्नारोपितसर्वपदार्थऽव-भासकवस्तुत्वम् । आनन्दरुपत्वं नाम परमप्रेमास्पदत्वं नित्यनिरतिशयमानन्दस्वरुपत्वम् । विज्ञानमानन्दं ब्रह्म इति श्रुतेः।[12] एवं नित्यशुद्धबुद्धमुक्तस्वभावं ब्रह्माहमस्मि इति संशयसम्भावनाविपरितभावनाराहित्येन यस्तु जानाति स जीवन्मुक्तः उच्यते । ब्रह्मात्मैक्यभावे जाते संसारनिवृत्तिर्भविष्यति नान्यथा।"अशव्दमस्पर्शमरूपमव्यय तथा रस नित्य अगन्धवच्च यत् । "विज्ञानंमानन्दं ब्रह्म","विज्ञानं घन एव", सत्यं ज्ञानमनन्तं ब्रह्म,[13] प्रज्ञानं ब्रह्म"[14] इति श्रुतेः। तथा च अपरा श्रुतिः –"स वा एष महानजमात्मा अजरोऽअमरोऽमृतोऽभय", "स यो ह वै तत्परमब्रह्मवेद ब्रह्मैव भवति।", "द्वितियाद्वै भयं भवति।" यत्र त्वस्य सर्वमात्मैवाभूत्", इत्यादिभिः ब्रह्मात्मैकत्वे प्रमाणानि।

साधकः यदि एवं चिन्तयति अहं सर्वं जानमि तर्हि स किमपि न जानाति । ब्रह्मज्ञानमेव नैव जायते । अपरोक्षानुभुतिरेव ब्रह्मज्ञानेन जायते। उच्यते केनोपनिषदि-

"नाऽहं मन्ये सुवेदेति नो न वेदेति वेद च ।
न स्तद्वेद तद्वेद नो न वेदेति वेद च" ॥[15]

धीरः धीमन्तः सर्वेषु भूतेषु आत्मनः दर्शनं कुर्वन्ति। स्वमात्मदर्शनेन कस्याऽपि जुगुप्सा न विद्यते। विद्वांसः सर्वेषु भूतेषु स्वात्मानं दृष्ट्वा अस्मात् लोकात् प्रयान्ति। उच्यते केनोपनिषदि-

"इह चेदवेदीदथ सत्यमस्ति
न चेदिहावेदीन्महती विनष्टि ।
भूतेषु भूतेषु विचित्य धीराः
प्रेत्यास्माल्लोकादमृता भवन्ति" ॥[16]

ये साधनसम्पन्नाः सन्तः ब्रह्मज्ञानं प्राप्नुवन्ति तेषां नोत्पत्तिः पुनरावृत्तिर्वा न बन्धो न मोक्षः अपितु तेषां नित्यमुक्तस्वरूपत्वात् ते परमार्थतः आत्मस्वरूपे निमग्नाः सन्ति । यदुक्तं माण्डूक्य कारिकायां–

"न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः ।
न मुमुक्षु न वै मुक्त इत्येषा परमार्थता" ॥[17] इत्यलं विस्तरेण ।

**सन्दर्भ**


1. गीता.२/६४
2. तत्र-२/५४
3. गीता-५/६
4. तत्र-५/१०
5. मु-३/२/४
6. गीता-७/११
7. मुण्डके-३/२/४
8. मुण्डके-३/१/५
9. म.शा-प.४-२५०-४
10. विवेकचूडामणिः-१९-२०
11. तत्र-२३
12. बृहदारण्यके-३/९/२२
13. तैत्तरीये-२/१
14. ऐतरीये-३/१/२१
15. केन.उ.-२/२/२
16. केन-२-२-५
17. माण्डूक्यकारिका-२/३२
18. १.श्रीमद्भगवद्गीता
19. २.पञ्चदशी
20. ३.केनोपनिषतद्

21. ४.मुण्डकोपनिषद्
22. ५.महाभारतम्
23. ६.ब्रह्मसूत्रम्
24. ७.माण्डूक्यकारिका
25. ७.तैत्तरीयोपनिषद्
26. ८.ऐत्तरीरोपनिषद्
27. ९.विवेकचूडामणिः